# Aryatarasragdhara Stotram

# આર્યતારાસ્રગ્ધરાસ્તોત્રમ્

## Document Information

Text title : Aryatarasragdhara Stotram

File name : AryatArAsragdharAstotram.itx

Category : devii, devI, buddha, stotra

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# આર્યતારાસ્રગ્ધરાસ્તોત્રમ્

નમસ્તારાયૈ ।
બાલાર્કાલોકતામ્રપ્રવરસુરશિરશ્ચારુચૂડામણિશ્રી-
સમ્પત્સમ્પર્કરાગાનતિચિરરચિતાલક્તકવ્યક્ત ભક્તી ।
ભક્ત્યા પાદૌ તવાર્યે કરપુટમુકુટાટોપભુગ્નોત્તમાઙ્ગ-
સ્તારિણ્યાપચ્છરણ્યે નવનુતિકુસુમસ્રગ્ભિરભ્યર્ચયામિ ॥ ૧॥

દુર્લઙ્ઘ્યે દુઃખવહ્નૌ વિનિપતિતતનુર્દુર્ભગઃ કાન્દિશીકઃ
કિં કિં મૂઢઃ કરોમીત્યસકૃદપિ કૃતારમ્ભવૈયર્થ્યખિન્નઃ ।
શ્રુત્વા ભૂયઃ પરેભ્યઃ ક્ષતનયન ઇવ વ્યોમ્નિ ચન્દ્રાર્કલક્ષ્મી-
માલોકાશાનિબદ્ધઃ પરગતિગમનસ્ત્વાં શ્રયે પાપહન્ત્રીમ્ ॥ ૨॥

સર્વસ્મિન્ સત્ત્વમાર્ગે નનુ તવ કરુણા નિર્વિશેષં પ્રવૃત્તા
તન્મધ્યે તદ્ગ્રહેણ ગ્રહણમુપગતં માદૃશસ્યાપ્યવશ્યમ્ ।
સામર્થ્યં ચ દ્વિતીયં સકલજગદઘધ્વાન્તતિગ્માંશુબિમ્બં
દુઃખ્યેવાહં તથાપિ પ્રતપતિ ધિગહો દુષ્કૃતં દુર્વિદગ્ધમ્ ॥ ૩॥

ધિગ્ધિઙ્ માં મન્દભાગ્યં દિવસકરરુચાપ્યપ્રણૂતાન્ધકારં
તૃષ્યન્તં કૂલકચ્છે હિમશકલશિલાશીતલે હૈમવત્યાઃ ।
રત્નદ્વીપપ્રતોલ્યા વિપુલમણિગુહાગેહગર્ભે દરિદ્રં
નાથીકૃત્યાપ્યનાથં ભગવતિ ભવતીં સર્વલોકૈકધાત્રીમ્ ॥ ૪॥

માતાપિ સ્તન્યહેતોર્વિરુવતિ તનયે ખેદમાયાતિ પુત્રે
ક્રોધં ધત્તે પિતાપિ પ્રતિદિવસમસત્પ્રાર્થનાસુ પ્રયુક્તઃ ।
ત્વં તુ ત્રૈલોક્યવાઞ્છાવિપુલફલમહાકલ્પવૃક્ષાગ્રવલ્લી
સર્વેભ્યોઽભ્યર્થિતાર્થાન્ વિસૃજસિ ન ચ તે વિક્રિયા જાતુ કાચિત્ ॥ ૫॥

યો યઃ ક્લેશૌઘવહ્નિજ્વલિતતનુરહં તારિણી તસ્ય તસ્યે-
ત્યાત્મોપજ્ઞાં પ્રતિજ્ઞાં કુરુ મયિ સફલાં દુઃખપાતાલમગ્ને ।
વર્ધન્તે યાવદેતે પરુષપરિભવાઃ પ્રાણિનાં દુખવેગાઃ

સમ્યક્સમ્બુદ્ધયાને પ્રણિધિધૃતધિયાં તાવદેવાનુકમ્પા ॥ ૬॥

ઇત્યુચ્ચૈરુર્ધ્વવાહૌ નદતિ નુતિપદવ્યાજમાક્રન્દનાદં
નાર્હત્યન્યોઽપ્યુપેક્ષાં જનનિ જનયિતું કિં પુનર્યાદૃશી ત્વમ્ ।
ત્વત્તઃ પશ્યન્ પરેષામભિમતવિભવપ્રાર્થનાઃ પ્રાપ્તકામા
દહ્યે સહ્યેન ભૂયસ્તરમરતિભુવા સન્તતાન્તર્જ્વરેણ ॥ ૭॥

પાપી યદ્યસ્મિ કસ્માત્ત્વયિ મમ મહતી બર્દ્ધતે ભક્તિરેષા
શ્રુત્વા સ્મૃત્વા ચ નામ્નાપ્યપહરસિ હઠાત્પાપમેકા ત્વમેવ ।
ત્યક્તવ્યાપારભારા તદસિ મયિ કથં કથ્યતાં તથ્યકથ્યે
પથ્યં ગ્લાને મરિષ્યત્યપિ વિપુલકૃપઃ કિં ભિષગ્ રોરુધીતિ ॥ ૮॥

માયામાત્સર્યમાનપ્રભૃતિભિરધમૈસ્તુલ્યકાલક્રમાચ્ચ
સ્વૈર્દોષૈર્વાહ્યમાનો મઠકરભ ઇવાનેકસાધારણાંશઃ ।
યુષ્મત્પાદાબ્જપૂજાં ન ક્ષણમપિ લભે યત્તદર્થે વિશેષા-
દેષા કાર્પણ્યદીનાક્ષરપદરચના સ્યાન્મમાવન્ધ્યકામા ॥ ૯॥

કલ્પાન્તોદ્ભ્રાન્તવાતભ્રમિતજલચલલ્લોલકલ્લોલહેલા-
સંક્ષોભોત્ક્ષિપ્તવેલાતટવિકટચટત્સ્ફોટમોટ્ટાટ્ટહાસાત્ ।
મજ્જદ્ભિર્ભિન્નનૌકૈઃ સકરુણરુદિતાક્રન્દનિષ્પન્દમન્દૈઃ
સ્વચ્છન્દં દેવિ સદ્યસ્ત્વદભિનુતિપરૈસ્તીરમુત્તીર્યતેઽબ્ધેઃ ॥ ૧૦॥

ધૂમભ્રાન્તાભ્રગર્ભોદ્ભવગગનગૃહોત્સઙ્ગરિઙ્ગત્સ્ફુલિઙ્ગ-
સ્ફૂર્જજ્જ્વાલાકરાલજ્વલનજવવિશદ્વેશ્મવિશ્રાન્તશય્યાઃ ।
ત્વય્યાબદ્ધપ્રણામાઞ્જલિપુટમુકુટા ગદ્ગદોદ્ગીતયાચ્ઞાઃ
પ્રોદ્યદ્વિદ્યુદ્વિલાસોજ્જ્વલજલદજવૈરાધ્રિયન્તે ક્ષણેન ॥ ૧૧॥

દાનામ્ભઃપૂર્યમાણોભયકટકટકાલમ્બિરોલમ્બમાલા-
હૂઙ્કારાહૂયમાનપ્રતિગજજનિતદ્વેષવહ્નેર્દ્વિપસ્ય ।
દન્તાન્તોત્તુઙ્ગદોલાતલતુલિતતનુસ્ત્વામનુસ્મૃત્ય મૃત્યું
પ્રત્યાચષ્ટે પ્રહૃષ્ટઃ પૃથુશિખરશિરઃકોટિકોટ્ટોપવિષ્ટઃ ॥ ૧૨॥

પ્રૌઢપ્રાસપ્રહારપ્રહતનરશિરઃશૂલવલ્લ્યુત્સવાયાં
શૂન્યાટવ્યાં કરાગ્રગ્રહવિલસદસિસ્ફેટકસ્ફીતદર્પાન્ ।
દસ્યૂન્ દાસ્યે નિયુઙ્ક્તે સભૃકુટિકુટિલભ્રૂકટાક્ષેક્ષિતાક્ષાં-
શ્ચિન્તાલેખન્યખિન્નસ્ફુટલિખિતપદં નામધામ શ્રિયાં તે ॥ ૧૩॥

વજ્રક્રૂરપ્રહારપ્રખરનખમુખોત્ખાતમત્તેભકુમ્ભ-
શ્ચ્યોતત્સાન્દ્રાસ્રધૌતસ્ફૂટવિકટસટાસઙ્કટસ્કન્ધસન્ધિઃ ।
ક્રુધ્યન્નાપિત્સુરારાદુપરિ મૃગરિપુસ્તીક્ષ્ણદંષ્ટ્રોત્કટાસ્ય-
સ્ત્રસ્યન્નાવૃત્ય યાતિ ત્વદુચિતરચિતસ્તોત્રદિગ્ધાર્થવાચઃ ॥ ૧૪॥

ધૂમાવર્તાન્ધકારાકૃતિવિકૃતફણિસ્ફારફૂત્કારપૂર-
વ્યાપારવ્યાત્તવક્ત્રસ્ફુરદુરુરસનારજ્જુકોનાશપાશૈઃ ।
પાપાત્સમ્ભૂય ભૂયસ્તવગુણગણનાતત્પરસ્ત્વત્પરાત્મા
ધત્તે મત્તાલિમાલાવલયકુવલસ્રગવિભૂષાં વિભૂતિમ્ ॥ ૧૫॥

ભર્તૃભ્રૂભેદભીતોદ્ભટકટકભટાકૃષ્ટદુઃશ્લિષ્ટકેશ-
શ્ચ્યચ્ચદ્વાચાટચેટોત્કટરટિતકટુગ્રન્થિપાશોપગૂઢઃ ।
ક્ષુત્તૃટ્ક્ષામોપકણ્ઠસ્ત્યજતિ સ સપદિ વ્યાપદં તાં દુરન્તાં
યો યાયાદાર્યતારાચરણશરણતાં સ્નિગ્ધબન્ધૂજ્ઝિતોઽપિ ॥ ૧૬॥

માયાનિર્માણકર્મક્રમકૃતવિકૃતાનેકનેપથ્યમિથ્યા-
રૂપારમ્ભાનુરૂપપ્રહરણકિરણાડમ્બરોડ્ડામરાણિ ।
ત્વત્તન્ત્રોદ્ધાર્યમન્ત્રસ્મૃતિહૃતદુરિતસ્યાવહન્ત્યપ્રધૃષ્યાં
પ્રેતપ્રોતાન્ત્રતન્ત્રીનિચયવિરચિતસ્રજ્જિ રક્ષાંસિ રક્ષામ્ ॥ ૧૭॥

ગર્જજ્જીમૂતમૂર્તિત્રિમદમદનદીબદ્ધધારાન્ધકારે
વિધુદ્દ્યોતાયમાનપ્રહરણકિરણે નિષ્પતદ્બાણવર્ષે ।
રુદ્ધઃ સઙ્ગ્રામકાલે પ્રબલભુજબલૈર્વિદ્વિષદ્ભિર્દ્વિષદ્ભિ-
સ્ત્વદ્દત્તોત્સાહપુષ્ટિઃ પ્રસભમરિમહીમેકવીરઃ પિનષ્ટિ ॥ ૧૮॥

પાપાચારાનુબન્ધોદ્ધૃતગદવિગલત્પૂતિપૂયાસ્રવિસ્ર-
ત્વઙ્માંસાસક્તનાડીમુખકુહરગલજ્જન્તુજગ્ધક્ષતાઙ્ગાઃ ।
યુષ્મત્પાદોપસેવાગદવરગુટિકાભ્યાસભક્તિપ્રસક્તા
જાયન્તે જાતરૂપપ્રતિનિધિવપુષઃ પુણ્ડરીકાયતાક્ષાઃ ॥ ૧૯॥

વિશ્રાન્તં શ્રૌતપાત્રે ગુરુભિરુપહૃતં યસ્ય નામ્નાયભૈક્ષ્યં
વિદ્વદ્ગોષ્ઠીષુ યશ્ચ શ્રુતધનવિરહાન્મૂકતામભ્યુપેતઃ ।
સર્વાલઙ્કારભૂષાવિભવસમુદિતં પ્રાપ્ય વાગીશ્વરત્વં
સોઽપિ ત્વદ્ભક્તિશક્ત્યા હરતિ નૃપસભે વાદિસિંહાસનાનિ ॥ ૨૦॥

ભૂશય્યાધૂલિધૂમ્રઃ સ્ફુટિતકટિતટીકર્પટોદ્દ્યોતિતાઙ્ગો
યૂકાયૂંષિ પ્રપિંષન્ પરપુટપુરતઃ કર્પરે તર્પણાર્થી ।

ત્વામારાધ્યાધ્યવસ્યન્ વરયુવતિવહચ્ચામરસ્મેરચાર્વી-
મૂર્વી ધત્તે મદાન્ધદ્વિપદશનઘનામુદ્ધૃતૈકાતપત્રામ્ ॥ ૨૧॥

સેવાકર્માન્તશિલ્પપ્રણયવિનિમયોપાયપર્યાયખિન્નાઃ
પ્રાગ્જન્મોપાત્તપુણ્યોપચિતશુભફલં વિત્તમપ્રાપ્નુવન્તઃ ।
દૈવાતિક્રામણીં ત્વાં કૃપણજનજનન્યર્થમભ્યર્થ્ય ભૂમે-
ર્ભૂયો નિર્વાન્તચામીકરનિકરનિધીન્ નિર્ધનાઃ પ્રાપ્નુવન્તિ ॥ ૨૨॥

વૃત્તિચ્છેદે વિલક્ષઃ ક્ષતનિવસનયા ભાર્યયા ભર્ત્સ્યમાનો
દૂરાદાત્મમ્ભરિત્વાત્ સ્વજનસુતસુહૃદ્બન્ધુભિર્વર્જ્યમાનઃ ।
ત્વય્યાવેદ્ય સ્વદુઃખં તુરગખુરમુખોત્ખાતસીમ્નાં ગૃહાણાં
ઈષ્ટે સ્વાન્તઃપુરસ્ત્રીવલયઝણઝણાજાતનિદ્રાપ્રબોધઃ ॥ ૨૩॥

ચઙ્ક્રદ્દિક્ચક્રચુમ્બિસ્ફુરદુરુકિરણા લક્ષણાલઙ્કૃતા સ્ત્રી-
ષટ્દન્તો દન્તિમુખ્યઃ શિખિગલકરુચિશ્યામરોમા વરાશ્વઃ ।
ભાસ્વદ્ભાસ્વન્મયૂખો મણિરમલગુણઃ કોષભૃત્ સ્વર્ણકોષઃ
સેનાનીર્વીરસૈન્યો ભવતિ ભગવતિ ત્વત્પ્રસાદાંશલેશાત્ ॥ ૨૪॥

સ્વચ્છન્દં ચન્દનામ્ભઃસુરભિમણિશિલાદત્તસઙ્કેતકાન્તઃ
કાન્તાક્રીડાનુરાગાદભિનવરચિતાતિથ્યતથ્યોપચારઃ ।
ત્વદ્વિદ્યાલબ્ધસિદ્ધિર્મલયમધુવનં યાતિ વિદ્યાધરેન્દ્રઃ
ખઙ્ગાંશુશ્યામપીનોન્નતભુજપરિઘપ્રોલ્લસત્પારિહાર્યઃ ॥ ૨૫॥

હારાક્રાન્તસ્તનાન્તાઃ શ્રવણકુવલયસ્પર્દ્ધમાનાયતાક્ષ્યો
મન્દારોદારવેણીતરુણપરિમલામોદમાદ્યદ્દ્વિરેફાઃ ।
કાઞ્ચીનાદાનુબન્ધોદ્ધતતરચરણોદારમઞ્જીરતૂર્યાસ્
ત્વન્નાથાન્ પ્રાર્થયન્તે સ્મરમદમુદિતાઃ સાદરા દેવકન્યાઃ ॥ ૨૬॥

રત્નચ્છન્નાન્તવાપીકનકકમલિનીવજકિઞ્જલ્કમાલાં
ઉન્મજ્જત્પારિજાતદ્રુમમધુપવધૂદ્ધૂતધૂલીવિતાનામ્ ।
વીણાવેણુપ્રવીણામરપુરરમણીદત્તમાધુર્યતૂર્યાં
કૃત્વા યુષ્મત્સપર્યામનુભવતિ ચિરં નન્દનોદ્યાનયાત્રામ્ ॥ ૨૭॥

કર્પૂરૈલાલવઙ્ગત્વગગુરુનલદક્ષોદગન્ધોદકાયામ્ ।
કાન્તાકન્દર્પદર્પોત્કટકુચકુહરાવર્તવિશ્રાન્તવીચ્યામ્ ।
મન્દાકિન્યામમન્દચ્છટસલિલસરિત્ક્રીડયા સુન્દરીભિઃ
ક્રીડન્તિ ત્વદ્ગતાન્તઃકરણપરિણતોત્તમપુણ્યપ્રભાવાઃ ॥ ૨૮॥

ગીર્વાણગ્રામણીભિર્વિનયભરનમન્મૌલિભિર્વન્દિતાઙ્ઘ્રિઃ
સ્વર્ગોત્સઙ્ગેऽધિરૂઢઃ સુરકરિણિ ઝણદ્ભૂષણોદ્ભાસિતાઙ્ગે ।
શચ્યા દોર્દામદોલાવિરલવલયિતોદ્દામરોમાઞ્ચમૂર્તિઃ
પૂતસ્ત્વદ્દૃષ્ટિપાતૈરવતિ સુરમહીં હીરભિન્નપ્રકોષ્ઠઃ ॥ ૨૯॥

ચૂડારત્નાવતંસાસનગતસુગતવ્યોમલક્ષ્મીવિતાનં
પ્રોદ્યદ્બાલાર્કકોટીપટુતરકિરણાપૂર્યમાણત્રિલોકમ્ ।
પ્રૌઢાલીઢૈકપાદક્રમભરવિનમદ્બ્રહ્મરુદ્રેન્દ્રવિષ્ણું
ત્વદ્રૂપં ભાવ્યમાનં ભવતિ ભવભયચ્છિત્ત્યે જન્મભાજામ્ ॥ ૩૦॥

પશ્યન્ત્યેકે સકોપં પ્રહરણકિરણોદ્દીર્ણદોર્દણ્ડખણ્ડ-
વ્યાપ્તવ્યોમાન્તરાલં વલયફણિફણાદારુણાહાર્યચર્યમ્ ।
દ્વિષ્ટવ્યત્રાસિહાસોડ્ડમરડમરુકોડ્ડામરાસ્ફાલવેલા-
વેતાલોત્તાલતાલપ્રમદમદમહાકેલિકોલાહલોગ્રમ્ ॥ ૩૧॥

કેચિત્ત્વેકૈકરોમોદ્ગમગતગગનાભોગભૂભૂતલસ્થ-
સ્વસ્થબ્રહ્મેન્દ્રરુદ્રપ્રભૃતિનરમરુત્સિદ્ધગન્ધર્વનાગમ્ ।
દિક્ચક્રાક્રામિધામસ્થિતસુગતશતાનાન્તનિર્માણચિત્તં
ચિત્રં ત્રૈલોક્યવન્દ્યં સ્થિરચરરચિતાશેષભાવસ્વભાવમ્ ॥ ૩૨॥

લાક્ષાસિન્દૂરરાગારુણતરકિરણાદિત્યલૌહિત્યમેકે
શ્રીમત્સાન્દ્રેન્દ્રનીલોપલદલિતદલક્ષોદનીલં તથાન્યે ।
ક્ષીરાબ્ધિક્ષુબ્ધદુગ્ધાધિકતરધવલં કાઞ્ચનાભં ચ કેચિત્
ત્વદ્રૂપં વિશ્વરૂપં સ્ફટિકવદુપધાયુક્તિભેદાદ્ વિભિન્નમ્ ॥ ૩૩॥

સાર્વજ્ઞજ્ઞાનદીપપ્રકટિતસકલજ્ઞેયતત્ત્વૈકસાક્ષી
સાક્ષાદ્વેત્તિ ત્વદીયાં ગુણગણગણનાં સર્વવિત્ તત્સુતો વા ।
યસ્તુ વ્યાદાય વક્ત્રં વલિભુજરટિતં માદૃશો રારટીતિ
વ્યાપત્ સા તીવ્રદુઃખજ્વરજનિતરુજશ્ચેતસો હાસ્યહેતુઃ ॥ ૩૪॥

યન્મે વિજ્ઞાપ્યમાનં પ્રથમતરમદસ્ત્વં વિશેષેણ વેત્ત્રી
તદ્વ્યાહારાતિરેકશ્રમવિધિરબુધસ્વાન્તસન્તોષહેતુઃ ।
કિન્તુ સ્નિગ્ધસ્ય બન્ધોર્વિષમિવ પુરતો દુઃખમુદ્ગીર્ય વાચાં
જ્ઞાતાર્થસ્યાપિ દુઃખી હૃદયલઘુતયા સ્વસ્થતાં વિન્દતીવ ॥ ૩૫॥

કલ્યાણાનન્દસિન્ધુપ્રકટશશિકલે શીતલાં દેહિ દૃષ્ટિં

પુષ્ટિં જ્ઞાનોપદેશૈઃ કુરુ ધનકરુણે ધ્વંસય ધ્વાન્તમન્તઃ ।
ત્વત્સ્તોત્રામ્ભઃપવિત્રીકૃતમનસિ મયિ શ્રેયસઃ સ્થાનમેકં
દૃષ્ટં યસ્માદમોઘં જગતિ તવગુણસ્તોત્રમાત્રં પ્રજાનામ્ ॥ ૩૬॥

સંસ્તુત્ય ત્વદ્ગુણૌઘાવયવમનિયતેયત્તમાપ્તં મયા યત્
પુણ્યં પુણ્યાર્દ્રવાઞ્છાફલમધુરરસાસ્વાદમામુક્તિભોગ્યમ્ ।
લોકસ્તેનાર્યલોકેશ્વરચરણતલસ્વસ્તિકસ્વસ્તિચિહ્ના-
મહ્નાયાયં પ્રયાયાત્ સુગતસુતમહીં તાં સુખાવત્યુપાખ્યામ્ ॥ ૩૭॥

ઇતિ શ્રી સર્વજ્ઞમિત્રવિરચિતમાર્યતારાસ્રગ્ધરાસ્તોત્રં સમ્પૂર્ણમ્ ॥

---

*Aryatarasragdhara Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*